Conclusion

# उपसंहारः

परस्परवैचित्र्यविशिष्टेन गुणत्रयेण विनिर्मितेस्मिन् जगति परस्परवैचित्र्यं नैसर्गिकमेव। अत एव मानवा अपि परस्परविलक्षणसंभरिता दृक्गोचरतां प्रयान्ति। मानवस्यान्तर्वृत्तीनां तृप्त्यर्थं यादृशमक्षयभाण्डागारं पृथिवीमातुः क्रोडे समुपलब्धमस्ति न तदन्यत्रक्वचित्। एतद् सर्वं मानवस्य कृते ईश्वरेण प्रदत्तोऽमूल्योपहारः वर्तते। रुप–रस–गन्ध–स्पर्श–श्रवणादिद्वाराऽनुभूताः सर्वे विषयाः पशु–पक्षी–वृक्ष–लता–गिरि–गुहा–सरिता–निर्झराश्च पर्यावरणान्तर्गताः गृह्यन्ते। ते सर्वे मूलप्रकृतितः समागताः येषं विना वयं किमपि कर्तुं शक्नुमः। यदा मानवः विवेकरिहतो भूत्वा ईश्वरप्रदत्तसमस्तवस्तूनांदुरुपयोगं करोति तदा पर्यावरणप्रदूषणसमस्याऽस्माकं पार्श्वे समागच्छति।

अस्माकं संस्कृतसाहित्यग्रन्थेषु व्यासादारभ्य आदिकविः वाल्मीकिः, माघः, भासः, बाणभट्टादयः कवयः प्रकृतिचित्रणमाध्यमेन पर्यावरणविषये विलिख्य साहित्यिकग्रन्थानां रचना विधाय समाजाय लोकभोग्यकाव्यरूपे प्रदत्तवन्तः। तथाऽपि कालिदासस्य ग्रन्थेषु यो मानवप्रकृत्योर्नैसर्गिकपर्यावरणवैशिष्ट्यं दृश्यते,सोऽन्यकवीनां ग्रन्थेषु न्यूनं दृश्यते। प्रकृत्याः साकं महाकविः कालिदासस्याऽसीमानुरागो दृश्यते। अस्मात् कारणात् स प्रकृतिप्रेमिकविरूपेण साहित्यसंसारे सुविख्यातोऽस्ति। स प्रकृतेः कोमलरूपस्यैव प्रायः उपासको वर्तते। अतो रम्य–शान्त–तपोवन–नदीतटोपवन–मृग–कोकिलादीनां वर्णनं तस्मै–अधिकं रोचते।

कालिदासवर्णितसर्वाणिवस्तूनि यथार्थतः पर्यावरणपोषकाः सन्ति। एतत्सर्वं विचार्य–अनेन शोधप्रबन्धेन समाजाय लाभः स्यात्, तदर्थं महाकवेः विशालकायसप्तग्रन्थेषु यत्रकुत्राऽपि वर्णितपर्यावरणविषयं सम्यगालोड्य सञ्चयं कृत्वा शोधप्रबन्धमिमं विदूषां समक्षे स्थापयितुं प्रयासः कृतोऽस्ति मया। उपसंहारे साररूपेणाऽत्र सम्पूर्णविषयः उपनिबद्धोऽस्ति। अस्य शोधप्रबन्धस्य प्रारम्भे खलु तस्य विश्वप्रसिद्धकवेः साहित्यिकजीवनयात्राविषये ज्ञातुंसर्वेषां जिज्ञासा भवति, अतो हि तज्जिज्ञासान्निवारणाय प्रथमं तावत् कालिदासस्य जन्मकालः, स्थानम्, साहित्यिकवैविध्यादिविषये भिन्न भिन्न विदूषां मतं स्वीकृत्याऽत्र साहित्यिकयथोपलब्धसामग्र्याधारेणा च विवेचनमस्ति।

अग्रे गच्छता क्रमशः महाकवेः सप्तकृतीनां विस्ताररूपेण सरलभाषया वर्णनं वर्तते। यथा महाकवेः ग्रन्थानां विभागत्रयं समुपलभ्यते। महाकाव्यम्, काव्यम्, नाटकानि च ।

महाकवेः महाकाव्ये– रघुवंशमहाकाव्यम्, कुमारसम्भवमहाकाव्यम् समागच्छतः। काव्ये– मेघदूतम्, ऋतुसंहारम् स्वीकृते स्तः। नाटके– अभिज्ञानशाकुन्तलम्, विक्रमोर्वशीयम्, मालविकाग्निमित्रञ्च समागच्छन्ति। एषु ग्रन्थेषु महाकवेः वाण्याः समलंकृताः रसमाधूर्यभरिताः याः कथाः वर्तन्ते ताः कथारत्र विस्ताररुपेणोल्लिखिताः सन्ति,ताभिः साहित्यविद्यापिपासवः विद्वान्सःस्वान्तः सुखमनुभवन् सन्ति पुराकालतः।

कविताकान्तस्य प्रकृतिनटीनिर्वचनचतुरस्य महाकवेः कालिदासस्योपमादिरलंकारैरलंकृतावाणी अकुण्ठिता सततप्रवहनशीला वर्तते। तत्तद्ग्रन्थानां कथाश्रवणमात्रेण ज्ञानपिपासा समाप्तोनाऽभूत्। अतः ज्ञानपिपासापरिसमाप्तये पृथ्क्–पृथक्दृष्ट्या वैशिष्ट्यानां वर्णनमत्र क्रियते। यथा महाकवेः साहित्यिकदृष्ट्या नायक–नायिकानां चरित्रचित्रणवैशिष्ट्म्, आख्यानवैशिष्ट्म्, उपमावैशिष्ट्म्, वर्णनकलावैशिष्ट्म्, रघुवंशेपात्रादर्शवैशिष्ट्यम्,काव्योपदेशवैशिष्ट्यम्, काव्यशैलीवैशिष्ट्यानि चात्र सारूपेण वर्णितानि सन्ति।

साहित्यिकज्ञानस्य यदि समाजे उपयोगः न स्यात् तर्हि तस्योपयोगिता नास्ति। अतोऽग्रे सामाजिकदृष्ट्या यद् वैशिष्ट्यं वर्तते, सारतत्वरुपेण वर्णनमस्ति। समाजस्य विकासः धर्मे निहितोऽस्ति, सुगठितसमाजस्य निर्माणं धर्मं विना नैव सम्भवति, अतोऽग्रे समस्तग्रन्थानामनुशीलनानन्तरं यत्सारतत्वं प्राप्तं तत्तत्वमत्र वर्णितं वर्तते। कालिदासग्रन्थे वर्णधर्मेण सह आश्रमधर्मोऽपि प्रधानरूपेण कल्पितोऽस्ति। अतः कालिदासस्य कृतयः धार्मिकदृष्ट्यापि महत्वपूर्णं स्थानं भजन्ते।

धार्मिकदृष्ट्या यदि सुसमाजस्य मनसि कल्पना वर्तते, तत्र मूर्तरूपं साकारः विधानानाय सम्यग् दण्डनीतेर्व्यवस्था आवश्यकी भवति। अतः प्रसंगानुसारेणाऽग्रे राजनैतिकदृष्ट्या कालिदासस्य कृतीनां वैशिष्ट्यं प्रस्तूयते। कालिदासकाले न्यायव्यवस्था सुदृढाऽऽसीत्। अपराधाऽनुसारेण दण्डविधानं क्रियते स्म। तद्यथा– **"यथापराधदण्डानाम्" रघु.१/६**। कालिदासेन संसारस्याधिपतिरूपे संयुक्तभारतस्य कल्पना स्वग्रन्थेषु कृतमस्ति। रघ्वादिनृपाणां राज्यविस्तारः समद्रपर्यन्तं निर्दिष्टवानस्ति। यथा– " आसमुद्रक्षितीशानाम्" रघु. १/५।

महाकवेः कालिदासस्य हृदये स्वराष्ट्रं प्रति या उच्च भावनाऽऽसीत्, ता भावना प्रतिबिम्बरूपेण तेषां ग्रन्थेषु परितः दरीदृश्यते। राजनैतिकदृष्ट्या सुराष्ट्रनिर्माणार्थं देशस्य भौगोलिकज्ञानमावश्यकं भवति। तदर्थं भौगोलिकदृष्ट्या कालिदासकृतीनां वैशिष्ट्यं वर्णयन्

मयाऽत्र कालिदासग्रन्थेषु वर्णिताः सीमाः, पर्वताः, नद्यः, षडर्तवश्च येषा वर्णनं समासेन कृतमस्ति।

देशस्य भौगोलिकतथ्यानां सम्यग् ज्ञानार्थं पर्यावरणमपि सहायको भवति। तत्तद्देशस्य पर्यावरणज्ञानार्थ भौगोलिकज्ञानमावश्यकं भवति। अतः द्वयोरन्योन्याश्रयसम्बन्धो वर्तते। तस्मादत्र पर्यावरणपरकं सर्वं विषयं पृथक्रुपेण ग्रन्थस्योदाहरणान्यपि विलिख्य वर्णितोऽस्ति। ततोऽग्रे प्राच्य–नवीनविदूषां मते पर्यावरणस्य परिभाषा, अर्थः, पर्यावरणस्य मौलिकतत्वानि, पर्यावरणस्यवैविध्यम्, तत्संरक्षणोपायाः, तथा पर्यावरणस्य सामाजिकः, सांस्कृतिकदृष्ट्या महत्वं वर्णयन् पर्यावरणस्य स्वमत्याः समीक्षाऽपि कृताऽस्ति। तद्पश्चाद् महाकवेः कालिदासस्यकृतिषु यथाक्रमानुसारेण रघुवंशादारभ्य मालविकाग्निमित्रनाटकपर्यन्तं यत्रकुत्रापि महाकविना प्रत्यक्ष परोक्षरूपेण वर्णनाधारेण च पर्यावरणस्य च विषये यत्किञ्चिदपि वर्णनं कृतमस्ति, तेषां सर्वेषां स्थलानां प्रसंगानाञ्चऽऽधारीकृत्य समीक्षणं सोदाहरणं प्रस्तूतमस्ति।

संक्षेपेणाऽग्रे वैदिकसाहित्यस्य पर्यावरणमपि दत्तमस्ति। वेदेषु पृथिवीसंरक्षण्, जलसंरक्षणम्, वायुसंरक्षणम्, वनस्पतिजीवजन्त्वादिसंरक्षणम्, उर्जासंरक्षणञ्च विद्यते। एषा पृथिवी संसारस्य पोषणं वर्धनञ्च करोति। पृथिवीप्रदत्तसंसाधनानां प्रयोगे संवेदना सहानुभूतिश्च अभिलक्षितो भवति। तेन ऋषिः कथयति–

**"यत्ते भूमि विखनामि क्षिप्रं तदपि रोहतु।**

**मा ते मर्म विमृग्वरि माते हृदयमर्पिपम्।।अथर्व. १२/१/३५।।**

उपर्युक्तः कथनेन पृथिवीं प्रति संवेदना सहानुभूतिश्च दृश्यते। अग्रे पौराणिकसाहित्यस्य पर्यावरणचर्चा विस्तारेण कृतमस्ति। तदग्रे उपनिषदग्रन्थेष्वपि यत्र यत्र पर्यावरणं वर्तते, तत्रस्थ पर्यावरणविषयं सम्यगधित्यात्र टंकितं वर्तते। ततःपरं व्यासादारभ्य वाल्मीकिः, माघः, हर्षादि कवीनां पर्यावरणविषये किं योगदानं वर्तते, तस्य समासेन वर्णनं कर्तुं प्रयत्नं कृतवान्नस्मि। यथा– महाभारते वृक्षाणां षड्जातिविषये वर्णमस्ति। कादम्बर्याम् आश्रमसरोवरादि वर्णनेन पर्यावरणसन्तूलतां प्रति ऋषीणां कटिबद्धता दृश्यते। एवंप्रकारेण अन्यग्रन्थेऽपि पर्यावरणस्य मनोहरा शोभा द्रष्टुं शक्यते। अन्ते मया सर्वेषां महाकविनां पर्यावरणविषयं सम्यगालोड्य कालिदासस्य पर्यावरणविषये समीक्षाकर्तुंप्रयासः कृतोऽस्ति। शोधप्रबन्धस्यान्तिमे चरणे मानवजीवने पर्यावरणस्य कदा, कुत्र, कस्यां परिस्थित्यां प्रभावो भवति,अस्य ग्रन्थाधारेणऽनुशीलनं कृतोऽस्ति मया। शोधप्रबन्धस्य परिशिष्टे कालिदासस्य

अन्येषां कवीनां तुलनात्मकदृष्ट्या वर्णनं विद्यते। पर्यावरणे सामाजिकवर्गाणां रुचिर्जागृतिः स्यात् तदर्थं पर्यावरणपरक सूक्तीनां संग्रहमस्ति। कालिदासग्रन्थेषु वर्णितभौगोलिकस्थलम्, वनस्पति–जीव–जन्तूनामपि– उल्लेखोऽस्ति। पर्यावरणविषये अद्यावधि भूतानि विश्वस्तरीय कार्याणि, संधयश्च पर्यावरणपरकनियमान् अनेकपुस्तकेभ्यः संकलनं मम प्रबन्धभूतप्रयासोऽय विद्यते।

अखिलः पर्यावरणविवेचनात्मकः शोधप्रबन्धस्य सारसंग्रहेण निष्कर्षतः कथयितुं शक्यते यत् महाकवेः ग्रन्थेषु भारतीय पर्यावरणान्तर्गतं भारतस्य पर्यावरणीयपरिस्थितीनां केवलं यथार्थ निरूपणं नास्ति, अपितु भारतस्य–अनन्यसाधारणपर्यावरणीय दृष्टेरुन्मीलनमपि विद्यमानं विद्यते। वैश्विकपर्यावरणस्य संरक्षणार्थं कालिदासस्य दृष्टिः निःसन्देहोऽत्युपयोगी वर्तते, यतः भोगवादस्य दुष्परिणामैः सन्त्रस्त–आधुनिकमानवं पर्यावरणं प्रति वाञ्छिताऽऽचारविचारस्य व्यावहारिकप्रेरणा प्रदातुं समर्थोऽस्तीति।।

SMT. HANSA MEHTA LIBRARY